# संस्कृत वार्ता:

दिनाङ्क : 10.10.2026 सायम् : 06:20

<u>आदौ मुख्यवार्ता:</u>

- जन्तर-मन्तर-स्थले विरोध-समाह्वानेषु दिल्ली-आरक्षि-बलेन प्रवर्तिता सुदृढ-सुरक्षा-व्यवस्था, अनेके संदिग्धाः निरुद्धाः, राष्ट्रिय-राजधान्यां रेल-मेट्रो-सेवाः च आंशिकतया प्रभाविताः ।
- संवैधानिक-संस्थानां दुर्बलीकरणस्य, लोकतन्त्रे च जन-विश्वास-भञ्जनस्य विपक्षोपरि भाजपादलेन आक्षिप्तः गभीरारोपः ।
- प्रतिवेशि-देशेषु वैश्विक-सुरक्षा-समीकरणेषु च भारतस्य सूक्ष्म-दृष्टिः, आत्मनिर्भर-भारत-सङ्कल्पेन सशस्त्र-सेना-बलानि महा-रूपान्तरणं प्राप्नुवन्तीति रक्षामन्त्री राजनाथसिंहः ।
- संयुक्त-राष्ट्र-सभायां पाकिस्तानाय भारतस्य दृढ-प्रत्युत्तरम् उक्तञ्च यत् जम्मू-कश्मीरं वर्तते भारतस्य अभिन्नम् अङ्गम् ।
- भारतीय-ऋतु-विज्ञान-विभागेन अद्य बिहार-कर्नाटक-हिमाचलप्रदेश-जम्मू-कश्मीरेषु अतिवृष्टेः अनुमानं व्यञ्जितम् ।

-----------------------------------------------

<u>आरक्षि-प्रदर्शनसज्जा</u>

अद्य जन्तर-मन्तरस्थले सीजेपी इति समूहस्य विरोध-प्रदर्शनस्य आह्वानं वीक्ष्य दिल्ली-आरक्षि-बलेन नवदिल्ली-क्षेत्रे व्यापक-सुरक्षा-प्रबन्धाः विहिताः, येन जनसुरक्षा शान्ति-व्यवस्था च बाधिता न भवेत्। वार्ताहरैः सह सम्भाषणे दिल्ली-आरक्षि-उपायुक्तः कुमाराभिषेकः अवोचत् यत् क्षेत्रे लोक-व्यवस्थायाः अक्षुण्णतायै बहुषु स्थलेषु आरक्षि-बलानां निक्षेपः कृतः अस्ति। सः सूचितवान् यत् नवदिल्ली-मण्डले पूर्वोपाय-रूपेण सघन-अन्वेषण-प्रक्रिया प्रचलति, अथ च अद्यतने विरोध-प्रदर्शने भागं ग्रहीतुं यतमानाः कतिपय-जनाः पूर्वमेव निरुद्धाः सन्ति। अपरतश्च, यातायातारक्षि-उपायुक्तः विकास-कुमारः न्यरूपयत् यत् नवदिल्ली-क्षेत्रे यातायात-नियमनस्य

कारणात् दैनिक-यात्रिकाणां सौविध्याय वैकल्पिक-मार्गाणां व्यवस्था क्रियते, येन जन-सामान्यस्य गमागमे कोऽपि व्याघातः न स्यात्।

-----------------------------------------------

## विरोधि-नबीनः

भारतीय-जनता-दलस्य राष्ट्राध्यक्षेण नितिन-नबीनेन अद्य विपक्षि-दलानाम् उपरि देशे अस्थिरताम् उत्पादयितुं तथा च विदेशी-शक्तीनां सङ्केतेन कार्यं विधातुं गभीरः आरोपः विहितः।

नवदिल्ल्यां वार्ताहरैः सह सम्भाषणे श्रीनबीनेन विपक्षि-दलानामुपरि आक्षेपः कृतः यत्ते देशे अतीव-सङ्कटमयीं गभीरां च स्थितिं निर्मातुं प्रयतन्ते। सः अग्रे प्रत्यपादयत् यत् विपक्षि-दलैः संविधानस्य नाम्नि मिथ्या-प्रचारं कृत्वा जन-मतस्य अपमाननं विधीयते।

-----------------------------------------------

## राजनाथ-तरङ्गशक्तिः

रक्षामन्त्रिणा राजनाथसिंहेन प्रतिपादितं यत् भारतम् आधुनिक-युद्धकलायां अथ च वैश्विक-सुरक्षा-व्यवस्थायां सम्भूयमानान् द्रुत-परिवर्तनान् सूक्ष्मतया निरीक्षते ।

अद्य जोधपुर-वायुसेना-केन्द्रे षड्विंशत्यधिक-द्विसहस्रतमस्य तरङ्ग-शक्ति इति युद्धाभ्यासं सम्बोधयन् रक्षामन्त्री अवोचत् यत् पूर्व-प्रतिष्ठिता विश्व-व्यवस्था तीव्रगत्या परिवर्तमाना वर्तते, अपरत्र उदीयमानायाः नूतन-वैश्विक-व्यवस्थायाः स्वरूपम् एतावतापि अनिश्चितं वर्तते ।

-----------------------------------------------

## बङ्गाल-महालयः

अद्य महालय-पर्व सोल्लासं परिपाल्यते, येन सह भगवत्याः दुर्गायाः पारम्परिकम् आवाहनं अथ च बङ्गाल-प्रदेशस्य बृहत्तमस्य वार्षिक-महोत्सवस्य दुर्गा-पूजा-पर्वणः आगमन-सन्देशः प्राप्यते।पारम्परिक-हिन्दू-मान्यतानुसारम् अयं दिवसः पूर्वजेभ्यः श्रद्धाञ्जलि-समर्पणाय समर्पितानां पितृ-पक्षाणाम् परिसमाप्तेः अथ च देवी-पक्षाणाम् मङ्गलमय-प्रारम्भस्य परिचायकः

अस्ति। अस्माकं कोलकाता-वार्ताहरः सूचयति यत् महालय-पर्व आकाशवाण्याः कालजयी-ध्वनि-कार्यक्रमेण महिषासुरमर्दिनी इत्यनेन सह अभिन्नतया सम्बद्धमस्ति, यस्य प्रसारणम् प्रत्यूषे क्रियते । वीरेन्द्र-कृष्ण-भद्रस्य विशिष्ट-वाचनेन, संस्कृत-मन्त्र-घोषैः अथ च भक्ति-गीतैः सज्जितः अयं कार्यक्रमः वंशेभ्यः बङ्गाल-संस्कृतेः अविभाज्यम् अङ्गं वर्तते। भगवत्याः दुर्गायाः आवाहनेन सम्पूर्ण-परिवेशः भक्त्या, उत्कण्ठया अथ उत्सवीयोल्लासेन परिपूर्यते ।

--------------------------------------------------

<u>प्रधानमन्त्री-महालयः</u>

प्रधानमन्त्री नरेन्द्रमोदी महालयपर्वणः शुभावसरे देशवासिभ्यः शुभाशयान् प्रकटितवान्। सामाजिक-पटलीय-सन्देशे प्रधानमन्त्रिणा कामना कृता यत् भगवत्याः दुर्गायाः मङ्गलमयः आशीर्वादः समाजे सुखं, करुणां, नवाशां च सञ्चारयेत्। सः सर्वत्र शान्तेः समृद्धेः च साम्राज्यं प्रवर्धेत इति प्रार्थितवान्।

--------------------------------------------------

<u>यूएन-भारतसांसद्</u>

संयुक्त-राष्ट्र-सङ्घे भारतेन जम्बू-कश्मीर-विषये मिथ्या-प्रचाराय असत्य-कथनानां च कृते पाकिस्तानस्य तीव्रा भर्त्सना कृता। भारतेन दृढतया प्रतिपादितं यत् अयं केन्द्रशासित-प्रदेशः भारतस्य अभिन्नम् अपृथक्करणीयम् अङ्गम् अस्ति, सदैव स्थास्यति च। न्यूयॉर्क-नगरे संयुक्त-राष्ट्र-महासभायाः चतुर्थ-समितौ उपनिवेशवाद-उन्मूलन इति विषये आयोजितायां चर्चायां भारतेन प्रत्युत्तर-अधिकारस्य प्रयोगः कृतः। तत्र संसद्-सदस्या महिमा-कुमारी-मेवाड़-महोदया पाकिस्तान-प्रतिनिधेः वक्तव्यस्य प्रत्युत्तरं दत्तवती। न्यूयॉर्क-स्थितेन संयुक्त-राष्ट्र-सङ्घे भारतस्य स्थायी-मिशन इत्यनेन एक्स इति सामाजिक-पटले सूचितं यत् संसद्-सदस्यया महिमा-कुमारी-मेवाड़-महोदयया जम्मू-कश्मीर-सम्बद्ध-मिथ्यापवादानां प्रसाराय संयुक्त-राष्ट्र-मञ्चस्य दुरुपयोगाय च पाकिस्तानस्य तीव्र-निन्दा कृता।

--------------------------------------------------

**बीजेपी-विपक्षीयाः**

भारतीय-जनतापार्टीति दलेन अद्य प्रतिपादितं यत् सद्यः सम्पन्न-उप-निर्वाचनेषु दलस्य विजयेन इदं स्पष्टीभवति यत् देशे अराजकतां प्रसारयितुम् इच्छतां तत्त्वानां प्रयासाः लोकतन्त्रेण निरस्तीकृताः। नवदिल्ल्यां वार्ताहर-सम्मेलनं सम्बोधयन् भाजपा-सांसदः वरिष्ठ-नेता च रविशङ्करप्रसादः अवोचत् यत् भारतीय-जनता-दलम् शान्तिपूर्ण-प्रतिषेधस्य विरोधी नास्ति, किन्तु विपक्षि-दलानि स्वकीयां निर्वाचन-पराजयं परिहर्तुं मार्गेषु विरोध-प्रदर्शनस्य आश्रयं गृह्णन्ति। सः विपक्षि-दलानाम् उपरि आरोपं कृतवान् यत् ते स्व-प्रतिषेधेन विगत-त्रि-चतुर्दिनेभ्यः दिल्ली-वासिनां कृते महतः क्लेशान् उत्पादयन्ति। भाजपा-नेत्रा अग्रे स्पष्टीकृतं यत् देशः लोकतान्त्रिक-मर्यादया, संसदि निर्वाचित-प्रतिनिधिभिः अथ च उत्तरदायित्व-भावेन एव सञ्चाल्यते। सः लोकसभायां विपक्ष-नेतारं राहुल-गान्धिनम् अभिलक्ष्य आरोपम् अकरोत् यत् तेन संवैधानिक-संस्थानां गरिमा कलङ्किता अवमानिता च।

---------------------------------------------------

**त्रिपुराराज्ये महालयः**

सम्पूर्णे त्रिपुराराज्ये महालयः सुदृढविश्वासेन श्रद्धया च आचर्यते। प्रातःकाले बिरेन्द्र-कृष्ण-भद्र-वर्येण पठितस्य आकाशवाण्याः प्रतिष्ठितः भक्ति-कार्यक्रमस्य महिषासुरमर्दिनी इत्यस्य विशेषप्रसारणेन दिवसस्य आरम्भः अभवत्। महालयः पितृ-तर्पणस्य पवित्रः अवसरत्वेन आचर्यते, यदा जनाः प्रार्थनां कुर्वन्ति, पितृन् प्रति श्रद्धाञ्जलिम् अर्पयन्ति च। प्रातः कालात् एव अगरतला-नगरस्य विभिन्नेषु पवित्र-जल-कुण्डादि क्षेत्रेषु भक्तानां विशालः समूहः अनुष्ठानं कुर्वन्, स्वपितृभ्यः प्रार्थनां च कुर्वन् अस्ति। महालयस्य अवसरे अनेकानि सांस्कृतिकसंस्थाः अपि विशेषसांस्कृतिककार्यक्रमान् आयोजयन्ति स्म। महालयस्य आचरणेन, अगोमोनी इत्यस्य मधुरस्वराः सम्पूर्णे त्रिपुराराज्ये प्रतिध्वनितुम् आरभन्त, येन दुर्गा-देव्याः आगमनस्य उद्घोषणं भवति, दुर्गा-पूजायाः उत्सवभावः च आरभते।

---------------------------------------------------

**विकल्प शुक्लः निधनम्**

आकाशवाणी, रायपुरस्य उप-निदेशकः, विकल्प शुक्लः तीव्र-हृदयाघातेन अद्य अपराह्णे दिवङ्गतः। भारतीय-सूचना-सेवायाः समर्पित-अधिकारी श्रीशुक्लः छत्तीसगढ-राज्ये सार्वजनिक-प्रसारणस्य स्तम्भः आसीत्। वार्ताभियानेषु संवाद-कार्येषु च असाधारण-योगदानस्य कृते सः प्रसिद्धः आसीत्। सम्पूर्णे कार्यकाले सः सार्वजनिकप्रसारणे प्रमुखः व्यक्तित्वम् आसीत्। आकाशवाणी-परिवारः तस्य शोकाकुलपरिवाराय गभीरं शोकं प्रकटयति।

-------------------------------------------------

<u>ऋतु-विभाग</u>

भारत-ऋतु-विभागेन अद्य बिहार-कर्नाटक-हिमाचल-प्रदेश-जम्मू-कश्मीर-प्रदेशेषु प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति। आगामि द्वि-त्रि-दिनेषु पूर्वी-भारतस्य उत्तरी-प्रायद्वीपस्य च केषुचित् भागेषु, पूर्वोत्तर-भारतस्य अनेकेषु भागेषु च दक्षिण-पश्चिम-प्रावृट्-कालस्य पुनरागमन-स्थितेः परिष्कारः भवति।

।। इति वार्ताः ।।